International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2026; 3(4): 98-100
© 2026 IJMH
www.themultijournal.com
Received: 06-07-2026
Accepted: 29-07-2026
Publish : 03-08-2026

**बाबुला प्रधान:**
शिक्षाशास्त्रीय शोधच्छात्र:,
रा. सं.विश्वविद्यालय: तिरुपति: (आ.प्र)

**Correspondence:**
**बाबुला प्रधान:**
शिक्षाशास्त्रीय शोधच्छात्र:,
रा. सं.विश्वविद्यालय: तिरुपति: (आ.प्र)

# समाजनिर्माणे नारीणां योगदानम्
# Contribution of Women in Social Development

**बाबुला प्रधान:**

**प्रस्तावना**

भारते समाजनिर्माणे नारीणां भूमिका परिवर्तनकारिणी, अपरिहार्या च अस्ति। मातृत्वेन, शिक्षिकात्वेन, व्यावसायिकत्वेन, नेतृत्वकर्त्रीत्वेन च महिलाः राष्ट्रस्य प्रगतौ महत्त्वपूर्णं योगदानं यच्छन्ति। तासां योगदानं परिवारस्य पालन-पोषणात् आरभ्य ग्रामस्तरे स्वयंसहायतासमूहानां (SHG) माध्यमेन सामाजिकपरिवर्तनस्य प्रवर्तनपर्यन्तं विस्तृतम् अस्ति, विशेषतः ग्रामीणक्षेत्रेषु। शिक्षायाः तथा आजीविकायाः अवसराणां वृद्ध्या महिलाः आर्थिक-सामाजिक-विकासस्य प्रमुखशक्तिरूपेण उद्भूताः सन्ति। अद्यत्वे न केवलं गृहेषु, अपि तु विज्ञान-तन्त्रज्ञान-क्रीडा-प्रशासन-सेनादिषु विविधक्षेत्रेषु अपि ताः स्वप्रतिभां सिद्धं कुर्वन्ति।स्थानीयस्वशासनसंस्थासु आरक्षणादीनां व्यवस्थाभिः तासां राजनैतिकसहभागिता अपि वर्धिता, येन निर्णयप्रक्रियायां विकासकार्येषु च तासां प्रभावः सुदृढः अभवत्। एतदतिरिक्तं महिलाः सामाजपरिवर्तनाय आन्दोलनेषु अग्रणीभूमिकां निर्वहन्त्यः अन्यायस्य विरोधं कृत्वा समानतायाः, सामाजिकन्यायस्य, मानवाधिकाराणां च समर्थनम् अकुर्वन्। तासां सर्वतोमुखं योगदानम् एतत् सूचयति यत् भारतम् अधिकं समावेशी, प्रगतिशीलं च राष्ट्रं भवति, यत्र लैङ्गिकसमानता सततराष्ट्रीयविकासस्य मूलाधारः इति स्वीकृता अस्ति। भारतीयसंस्कृतौ नारीणां स्थानम् अत्यन्तं गौरवपूर्णम् अस्ति। प्राचीनकालात् एव नारीं "गृहलक्ष्मी", "जननी", "शक्तिस्वरूपिणी", "संस्कारदात्री" इति विविधैः नामभिः सम्मानितवती। यत्र नार्यः पूज्यन्ते तत्र देवताः रमन्ते इति मनुस्मृतिवचनं नारीणां महत्त्वं प्रकाशयति-

**"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥"**

नारी केवलं परिवारस्य आधारः नास्ति, अपितु सा सम्पूर्णसमाजस्य निर्माणे, विकासे, संस्कृतिरक्षणे, राष्ट्रोन्नत्यां च महत्त्वपूर्णां भूमिकां निर्वहति। मातृत्वेन, शिक्षिकात्वेन, समाजसेविकात्वेन, वैज्ञानिकत्वेन, राजनेत्रीत्वेन, साहित्यकारित्वेन, उद्यमिनीत्वेन च सा समाजस्य सर्वेषु क्षेत्रेषु अमूल्यं योगदानं ददाति। यदि समाजस्य स्थायिविकासः अपेक्षितः अस्ति, तर्हि नारीणां सशक्तीकरणं तेषां योगदानस्य सम्मानश्च अनिवार्यः।

**समाजनिर्माणस्य अवधारणा-**

समाजनिर्माणम् इति केवलं भौतिक-संरचनायाः, भवनादीनां निर्माणं वा केवलम् आर्थिकविकासः न भवति। वस्तुतः समाजनिर्माणस्य तात्पर्यम् अस्ति-नैतिकमूल्यानां संवर्धनम्, उत्कृष्टशिक्षायाः प्रसारः, सामाजिकसमता, आर्थिकसमृद्धिः, सांस्कृतिकपरम्पराणां संरक्षणम्, पर्यावरणसंवर्धनम्, राष्ट्रीयैक्यता तथा विश्वकल्याणस्य भावनायाः विकासः। एतेषां सर्वेषां क्षेत्राणां सर्वांगीणविकासे नारीणां भूमिका अत्यन्तमपरिहार्या वर्तते। यतो हि परिवारः समाजस्य प्रथमा आधारशिला अस्ति, तस्य च परिवारस्य

केन्द्रबिन्दुः मूलप्रेरिका च नारी एव भवति। प्रथमा शिक्षिका, संस्कारदात्री च भूत्वा सा भावीपीढ्याः चरित्रनिर्माणं करोति। अतः सत्यमेव प्रोक्तं यत् सशक्त-सस्कृत-समाजनिर्माणस्य वास्तविकः मूलाधारः नारी एव अस्ति।

**१.परिवारनिर्माणे नारीणां योगदानम्-**

समाजस्य आधारभूता संस्था परिवारः अस्ति। परिवारस्य निर्माणे, संरक्षणे, सुदृढीकरणे च नारी प्रमुखभूमिकां निर्वहति। "माता प्रथमः गुरुः" इति सुप्रसिद्धम्। उपनिषत्सु अपि उक्तम् अस्ति-"मातृदेवो भव" इति। बालस्य चरित्रनिर्माणं, नैतिकशिक्षा, अनुशासनबोधः, करुणा, सहिष्णुता, प्रेम, सेवाभावः इत्यादीनां संस्काराणां विकासः मातृद्वारा एव भवति। सुसंस्कृतः परिवारः एव सुदृढस्य समाजस्य निर्माणं करोति। अतः नारी "समाजस्य प्रथमा शिल्पकारिणी" इति कथ्यते। बालकः यादृशान् संस्कारान् गृह्णाति, तादृशः एव भविष्यत्-समाजः निर्मीयते। आधुनिके युगे अपि नारी परिवारस्य केवलं पालन-पोषणं न करोति, अपि तु प्रतिकूलपरिस्थितिषु अपि धैर्यपूर्वकं परिवारस्य रक्षणं करोति। सा परिवारे एकतां, स्नेहं, परस्पर-सहयोगस्य भावनां च स्थापयितुम् अहर्निशं यतते। नारीणां त्यागेन, समर्पणेन, कुशल-प्रबन्धनेन च गृहे शान्तिः समृद्धिः च तिष्ठति। एतदेव कारणं यत् अस्माकं संस्कृतौ नारी गृहलक्ष्मीः, परिवारस्य संवाहिका च मन्वा अस्ति।

**२.शिक्षाक्षेत्रे नारीणां योगदानम्-**

शिक्षा समाजस्य उन्नतेः प्रमुखसाधनम् अस्ति। नारी शिक्षिकात्वेन, शिक्षाविद्रूपेण, समाजसुधारिकात्वेन च ज्ञानस्य प्रसारं करोति। भारते सावित्रीबाई फुले महिलाशिक्षायाः अग्रदूतत्वेन प्रसिद्धा आसीत्। तया कन्याशिक्षायाः प्रचारः कृतः। फातिमा शेखः, पण्डिता रमाबाई, हंसामेहता, सैलबाला दासः, रेबा राय इत्यादयः अपि शिक्षाक्षेत्रे महनीयं कार्यं कृतवन्त्यः। अद्य महिलाः विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु च अध्यापनकार्ये संलग्नाः सन्ति। वैज्ञानिकशिक्षा, प्रौद्योगिकीशिक्षा, चिकित्साविज्ञानम्, न्यायशास्त्रम्, प्रशासनम् इत्यादिषु क्षेत्रेषु अपि महिलानां योगदानं निरन्तरं वर्धते। शिक्षिता नारी न केवलं स्वजीवनं परिवर्तयति, अपितु सम्पूर्णपरिवारस्य समाजस्य च उन्नतिं साधयति। शिक्षा एव नारी-सशक्तीकरणस्य मुख्यः स्तम्भः अस्ति। यदा एका नारी शिक्षिता भवति, तदा न केवलं सा स्वयं प्रबुद्धा भवति, अपि तु सम्पूर्णं कुलं समाजं च शिक्षितं करोति। सम्प्रति भारतसर्वकारेण चलापिताः 'बेटी बचाओ, बेटी पढ़ाओ' इत्यादयः उपक्रमाः महिलानां शिक्षणे, स्वावलम्बने च महतीं भूमिकां निर्वहन्ति। यदा महिलाः आर्थिकरूपेण आत्मनिर्भराः भवन्ति, तदा समाजे तासां निर्णयशक्तेः सम्मानं वर्धते, येन लैङ्गिकविषमता दूरीभवति।

**३. सामाजिकपरिवर्तने नारीणां योगदानम्-**

समाजे विद्यमानानां कुरीतीनाम्, अन्धविश्वासानां, जातिभेदस्य, लैङ्गिकविषमतायाः, बालविवाहस्य, यौतुकप्रथायाः अस्पृश्यतायाः च विरोधे अनेकाः महिलाः अग्रसराः अभवन्। रामादेवी चौधुरी, दुर्गाबाई देशमुखः, मदर टेरेसा, पार्वती गिरिः, मेधा पाटकरः, दयामणि बार्ला इत्यादयः समाजसेवायां विशिष्टं योगदानं दत्तवत्यः। ताः निर्धनानाम्, अनाथानाम्, आदिवासिनाम्, महिलानां बालकानां च हितार्थं निरन्तरं कार्यम् अकुर्वन्। महिलाः समाजे समानतायाः, न्यायस्य, मानवाधिकाराणां, सामाजिकसौहार्दस्य च स्थापनायां महत्त्वपूर्णां भूमिकां निर्वहन्ति। भारतस्य सामाजिक-क्रान्तौ स्त्री-शिक्षायाः अग्रदूता सावित्रीबाई फुले महोदयायाः योगदानम् अविस्मरणीयम् अस्ति। तादृशीनां विदुषीणां प्रयत्नैः समाजे रूढिवादितायाः उन्मूलनम् अभवत्। आधुनिके काले अपि पर्यावरण-संरक्षणाय 'चिपको-आन्दोलने' गौरा-देव्याः नेतृत्वम् अथवा सामाजिक-न्यायाय कृतानि आन्दोलनानि एतत् प्रमाणयन्ति यत् नारी समाजस्य केवलं भागः न, अपि तु सामाजिकपरिवर्तनस्य मुख्य-वाहिनी अस्ति। यदा एका नारी कुरीतीनां विरोधं करोति, तदा सम्पूर्णः समाजः परिवर्तनस्य दिशि अग्रसरः भवति।

**४. आर्थिकविकासे नारीणां योगदानम्-**

आधुनिककाले महिलाः आर्थिकविकासस्य प्रमुखशक्तिः अभवन्। कृषिक्षेत्रे, उद्योगेषु, व्यापारे, वित्तकोशेषु, स्वयंसहायतासमूहेषु, लघुउद्योगेषु, सूक्ष्मवित्तव्यवस्थायां च महिलानां सक्रियसहभागिता दृश्यते। एला भट्ट स्वयंसहायतासमूहस्य माध्यमेन असङ्ख्यानां महिलानां स्वावलम्बनं सुनिश्चितवती। कल्पना सरोज महोदया, अरुन्धती भट्टाचार्य, चेतना गाला सिन्हा, सुधा मूर्तिः इत्यादयः महिलाः उद्यमिता- वित्तव्यवस्था- समाजसेवादि क्षेत्रेषु प्रेरणा-स्रोताः सन्ति। आर्थिकरूपेण स्वावलम्बिनी नारी न केवलं स्वपरिवारस्य आर्थिकस्थितिं सुदृढां करोति, अपितु राष्ट्रस्य सकल-विकासे अपि योगदानं ददाति।

**५.राजनैतिकक्षेत्रे नारीणां योगदानम्-**

लोकतन्त्रे महिलानां सहभागिता समाजस्य सन्तुलितविकासाय अत्यावश्यकी वर्तते। भारतीयस्वतन्त्रतासंग्रामे रानी लक्ष्मीबाई, एनी बेसेन्ट, सरोजिनी नायडू, अरुणा आसफ अली, उषा मेहता इत्यादयः महिलाः असाधारणं साहसं नेतृत्वं च प्रदर्शितवत्यः। स्वातन्त्र्यानन्तरम् अपि विजयलक्ष्मी पण्डितः, सुचेता कृपालानी, प्रतिभा पाटिल इत्यादयः महिलाः प्रशासन-राजनैतिकक्षेत्रेषु उल्लेखनीयं कार्यम् अकुर्वन्। अद्य ग्रामपञ्चायतात् आरभ्य संसदपर्यन्तं महिलानां प्रतिनिधित्वं निरन्तरं वर्धमानम् अस्ति। तासां कुशलनेतृत्वेन सुशासनं, सामाजिकन्यायः, समावेशी-विकासश्च प्रोत्साहितः भवति।

स्थानीयस्वशासनसंस्थासु महिलाभ्यः लब्धेन आरक्षणेन ग्रामीण-नेतृत्वे महती क्रान्तिः आगता। साम्प्रतिके समये भारते महिलानां राजनैतिकसशक्तीकरणाय 'नारीशक्ति-वन्दन-अधिनियमः' संसदेन पारितः, येन लोकसभायां राज्यविधानसभासु च महिलाभ्यः त्रयस्त्रिंशत् प्रतिशतम् (33%) स्थानानि आरक्षितानि भविष्यन्ति। एषा

ऐतिहासिक-व्यवस्था तासां निर्णयप्रक्रियायां सहभागितां सुदृढां करिष्यति, येन भारतम् अधिकं समावेशी राष्ट्रं भविष्यति।

**६. सांस्कृतिकसंरक्षणे नारीणां योगदानम्-**

भारतीयसंस्कृतेः संरक्षणे महिलानां योगदानम् अमूल्यमस्ति। मातृभाषा, लोकपरम्परा, संस्काराः, उत्सवाः, गीतानि, नृत्यानि, कलाः, शिल्पानि च प्रायः मातृद्वारा एव एकस्मात् पिढ्याः अपरां पिढीं प्रति प्रेष्यन्ते। रुक्मिणीदेवी अरुण्डेल, कमलादेवी चट्टोपाध्याय, महादेवी वर्मा, एम्. एस्. सुब्बुलक्ष्मी, मृणालिनी साराभाई इत्यादयः महिलाः भारतीयकलासंस्कृतेः संरक्षणे प्रचारे च अविस्मरणीयं योगदानं दत्तवन्त्यः। नारी संस्कृतेः वाहिका अस्ति। तस्याः माध्यमेन राष्ट्रस्य सांस्कृतिकपरिचयः सुरक्षितः भवति।

**७. स्वास्थ्य-पर्यावरणसंरक्षणे च योगदानम्-**

महिलाः परिवारस्य स्वास्थ्यसंरक्षणे विशेषं ध्यानं ददति। स्वच्छता, पोषणम्, मातृशिशुस्वास्थ्यं, रोगनिवारणम् इत्यादिषु विषयेषु तासां जागरूकता समाजस्य स्वास्थ्यस्तरं वर्धयति। अद्य पर्यावरणसंरक्षणे अपि महिलाः सक्रियतया कार्यं कुर्वन्ति। वृक्षारोपणम्, जलसंरक्षणम्, प्लास्टिकनिषेधः, स्वच्छताभियानम्, जैविककृषिः इत्यादिषु कार्यक्रमेषु महिलानां सहभागिता उल्लेखनीया अस्ति। पर्यावरणसंरक्षणेन सततविकासस्य मार्गः प्रशस्तः भवति।

**८. विज्ञान-प्रौद्योगिकीक्षेत्रे नारीणां योगदानम्-**

पूर्वं विज्ञानक्षेत्रे महिलानां संख्या न्यूनासीद्, किन्तु आधुनिकयुगे महिलाः अन्तरिक्षविज्ञानम्, अभियान्त्रिकी, चिकित्साविज्ञानम्, सूचना-प्रौद्योगिकी, अनुसन्धानम् इत्यादिषु क्षेत्रेषु उल्लेखनीयं कार्यं कुर्वन्ति। महिलानां वैज्ञानिकयोगदानेन नवीनप्रौद्योगिकी, स्वास्थ्य-सेवा, सञ्चारव्यवस्था, अनुसन्धानक्षेत्रं च अधिकं विकसितमभवत्। एतेन समाजस्य जीवनस्तरः उन्नतः जातः।

**९. नैतिकमूल्येषु मानवतायां च योगदानम्**

समाजस्य विकासः केवलं आर्थिकसमृद्ध्या न माप्यते, अपितु नैतिकमूल्यैः अपि माप्यते। नारी दया, करुणा, प्रेम, सहिष्णुता, त्यागः, सेवा, सहकार्यभावः इत्यादीनां मूल्यनां संवर्धनं करोति। एते गुणाः सामाजिकसौहार्दस्य, शान्तेः, मानवतायाः च आधाराः सन्ति। यदा महिलाः सामाजिकनिर्णयेषु सहभागीन्यः भवन्ति तदा समाजे समता, सहानुभूतिः, न्यायः च अधिकं विकसिताः भवन्ति।

**अद्यतनसमस्याः-**

यद्यपि समाजनिर्माणे महिलानां योगदानम् अत्यन्तं महत्त्वपूर्णमस्ति, तथापि अद्यापि तासाम् पुरतः अनेकाः समस्याः आह्वानानि च दृश्यन्ते। तासु प्रमुखाः समस्याः निम्नलिखिताः सन्ति-

1. लैङ्गिकभेदः - समाजे अद्यापि पुत्र-पुत्र्योः मध्ये भेद-भावस्य मानसिकता दृश्यते।
2. निरक्षरता- ग्रामीण-दुर्गमक्षेत्रेषु बालिकानां उच्चशिक्षायाः अवसराः अद्यापि सीमिताः सन्ति।
3. आर्थिकनिर्भरता- आर्थिकरूपेण स्वावलम्बनाभावात् महिलाः निर्णयप्रक्रियायां उपेक्षिताः भवन्ति।
4. गार्हस्थ्यहिंसा- गृहेषु महिलानामुपरि क्रियमाणा शारीरिक-मानसिक-उत्पीडनात्मका हिंसा महती समस्या अस्ति।
5. बालविवाहः- कतिपयेषु क्षेत्रेषु अद्यापि अल्पवयसि बालिकानां विवाहः क्रियते, येन तासां स्वास्थ्यं विकासश्च प्रभावितौ भवतः।
6. कार्यस्थले असमानता- कार्यक्षेत्रेषु समानाधिकारस्य, समान-वेतनस्य च अभावः तथा च पदोन्नतौ पक्षपातः दृश्यते।
7. सुरक्षासम्बद्धाः समस्याः-कार्यस्थलेभ्यः महिलानां सुरक्षां प्रति निरन्तरं चिन्ता वर्तते।

एतासां समस्यानां निवारणकर्तुं गुणवत्ताशिक्षा, आर्थिकस्वावलम्बनम्, विधिगतरक्षणम्, सामाजिकजागरूकता, समानावसरः च आवश्यकाः सन्ति।

**निष्कर्षः-**

समाजनिर्माणे नारीणां योगदानम् अतुलनीयमस्ति। नारी केवलं परिवारस्य आधारः नास्ति, अपि तु समाजस्य, संस्कृतेः, राष्ट्रस्य च विकासस्य मूलशक्तिः अस्ति। शिक्षायाम्, समाजसुधारे, अर्थव्यवस्थायाम्, राजनीतौ, संस्कृतौ, विज्ञाने, पर्यावरणसंरक्षणे, नैतिक-मूल्यसंवर्धने च तस्याः योगदानम् अमूल्यमस्ति। नारीसशक्तीकरणं विना न समृद्धः समाजः, न विकसितं राष्ट्रम्, न च सततविकासः सम्भवति। अतः सर्वेषां कर्तव्यं भवति यत् महिलाभ्यः समानावकाशः, गुणवत्ताशिक्षा, सुरक्षिता सामाजिकपरिस्थितिः, आर्थिकस्वावलम्बनस्य साधनानि च प्रदीयन्ताम्। यदा नारी सम्मानिता, शिक्षिता, सशक्ता च भविष्यति, तदा एव समाजः समृद्धः, न्यायपूर्णः, प्रगतिशीलः च भविष्यति। यदा नारी सम्मानिता, शिक्षिता, स्वावलम्बिनी च भवति, तदा एव सुदृढस्य समाजस्य, सशक्त-राष्ट्रस्य च निर्माणं सम्भवति। अतः नारीणां सशक्तीकरणं केवलं तासां कल्याणाय न, अपि तु सम्पूर्णस्य राष्ट्रस्य सतत-विकासाय परममावश्यकमस्ति। एतदेव समाजनिर्माणे नारीणां महत्त्वस्य सारतत्त्वमस्ति। अन्ते महर्षिव्यासस्य सुप्रसिद्धं वचनं स्मर्तव्यम्-

**"नास्ति मातृसमा छाया, नास्ति मातृसमा गतिः।**
**नास्ति मातृसमं त्राणं, नास्ति मातृसमा प्रिया॥"**

**सन्दर्भग्रन्थसूची-**

मनुस्मृतिः
तैत्तिरीय उपनिषद्
**महाभारतम्**
Women Education and Development by R.N. Misra
Women and Social Change in India
Women and social reform in modern India
महिला सशक्तिकरण: प्रकृति एवं स्वरूप- रघुवंशी, राखी. (2018)
महिला सशक्तिकरण: चुनौतियाँ एवं समाधान- जैन, कामिनी।